संस्कृत वार्ता:

दिनाङ्क :-01.06.2026 प्रात: - 06:55

अथ वार्ताः

पीएम-ईरान राष्ट्रपति

प्रधानमन्त्री नरेन्द्रमोदी ह्यः ईरानस्य राष्ट्रपतिना डॉ. मसूर्द पेझेश्कियान इत्यनेन सह दूरभाषमाध्यमेन संभाषणम् अकरोत्। संभाषणावधौ राष्ट्रपतिना पेझेश्कियान इत्यनेन पश्चिम-एशियायाः घटनाक्रमस्य विषये प्रोदीरितम् ।

प्रधानमन्त्रिणा उभयोः देशयोः मध्ये सञ्जातं सहमतिं स्वागतीकृतं, सहैव तेन भारतस्य निरन्तर-नीतिः पुनः प्रतिपादिता यत् "सर्वेषां समाह्वानानां समाधानं केवलं संवादेन सुष्ठुनीत्या एव भवितुमर्हति।

वीबी-जीराम जी

विकसित भारत रोजगार एवं आजीविका मिशन (ग्रामीण) [VB-G RAM G]' इत्याख्यः अधिनियमः अद्यारभ्य अर्थात् जुलाई मासस्य एक दिनांकात् कृत्स्ने हि ग्रामीणभारते प्रवृत्तो भविष्यति। ग्रामीण-विकास-मन्त्रालयेन प्रतिपादितं यत् अयं अधिनियमः प्रत्येकं वित्तीयवर्षे पंचविंशत्युत्तरैकशतदिनानां सवेतन-वृत्तेः प्रतिभूतिं प्रदाय ग्रामीण-भारतस्य सशक्तिकरणं विधास्यति। देशे अस्य नूतन-तन्त्रस्य क्रियान्वयनार्थं अस्य वित्तीयवर्षस्य कृते द्वयनवत्युत्तरषट्शताधिक पंचनवतिः सहस्र कोटि-रूप्यकाणां प्रावधानं विहितम्।

अस्य उपक्रमस्य प्रवर्तने केन्द्रीय-ग्रामीणविकासमन्त्री शिवराज सिंह चौहानः अवदत् यत् कोपि अर्हः ग्रामीण-श्रमिकः एकमपि दिनं कार्यं विना न भवेत्। श्रीचौहानेन स्पष्टीकृतं यत् सर्वकारेण राज्यैः केन्द्रशासितप्रदेशैः च साकं दृढ-समन्वयं विधाय अस्याः नूतन-व्यवस्थायाः निर्बाध-सञ्चालनाय सर्वाः प्रशासकीय-वित्तीय च सज्जता कृता।

अवधेयं यत् पंचविंशत्युत्तरैकशत दिनानां वर्धिता अयं वृत्यवसर: ग्रामीण-आजीविकां सुदृढां करिष्यति, चिरस्थायी-सामुदायिक-सम्पत्तीनां निर्माणंच विधास्यति अनेन सहैव 'विकसित-भारतस्य' सङ्कल्पं तीव्रगत्या प्रवर्तयिष्यते।

जापान-पीएम

जापान-देशस्य प्रधानमन्त्री साने ताकाइची अद्य सायं त्रिविसीय-भारत-यात्राप्रसङ्गे नवदेहलीं प्राप्स्यति। इयं तस्याः प्रथमा आधिकारिकी भारत-यात्रा वर्तते। सा श्वः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह षोडशे भारत-जापान वार्षिक-शिखरसम्मेलने भागं ग्रहीष्यति।

इदं शिखरसम्मेलनम् उभयदेशयोः कृते द्विपक्षीय-सहयोगस्य समग्र-क्षेत्रस्य समीक्षां सुदृढीकरणं च विधातुम्, सहैव पारस्परिक-हितस्य क्षेत्रीय-वैश्विक-विषयेषु विचाराणां विनिमयीकरणं कर्तुम् एकं प्रकृष्टं अवसरं प्रदास्यति।

उत्तराखण्ड-मदरसा-शिक्षा

उत्तराखण्डराज्यस्य मदरसा-शिक्षा-प्रणाल्यां अद्यारभ्य एकं बृहत् परिवर्तनं प्रवृत्तं सञ्जातम्। अस्याः नूतन-व्यवस्थायाः अन्तर्गतं 'उत्तराखण्ड-मदरसा-शिक्षा-परिषद्' पूर्णतया निष्क्रियो भविष्यति, सहैव राज्यस्य सर्वाः अल्पसङ्ख्यक-शैक्षणिक-संस्थाः एकेन विनूत्नेन तन्त्रेण सञ्चालिताः भविष्यन्ति।

अद्य जुलाई मासस्य एक दिनाङ्कतः 'उत्तराखण्ड मदरसा शिक्षा बोर्ड', 'उत्तराखण्ड मदरसा शिक्षा बोर्ड अधिनियम-२०१६', तथा 'उत्तराखण्ड सर्वकारीयेतर अरबी एवं फारसी मदरसा मान्यता नियमावली-२०१९' इति एते सर्वे निष्प्रभाविनः अभवन्।

राज्यप्रशासनेन 'उत्तराखण्ड अल्पसङ्ख्यक शैक्षणिक संस्था अधिनियमस्य' अन्तर्गतं एका नूतना व्यवस्था प्रवर्तिता। अस्य प्रत्यग्र -तन्त्रस्य अन्तर्गतं 'उत्तराखण्ड राज्य अल्पसङ्ख्यक शिक्षा प्राधिकरणम्' एव शिक्षायै उत्तरदायि भविष्यति। इयं विनूतनप्रणाली मुस्लिम, सिख, जैन, ईसाई, बौद्ध पारसी इत्येतेषां सर्वेषां समुदायानां शैक्षणिक-संस्थासु समानरूपेण क्रियान्वितो भविष्यति।

।।इति वार्ता:।।